## 64 - चतुष्षष्टितम दशकम्
## गोविन्द पट्टाभिषेकम्

आलोक्य शैलोद्धरणादि रूपं प्रभाव मुच्चैस् तव गोप लोका: ।
विश्वेश्वरं त्वाम् अभिमत्य विश्वे नन्दं भवज्जातक मन्व पृच्छन् ॥॥64-1॥

गर्गोदितो निर्गदितो निजाय वर्गाय तातेन तव प्रभाव: ।
पूर्वाधिकस् त्वय्यनुराग एषाम् ऐधिष्ट तावत् बहुमानभार: ॥ ॥64-2॥

ततोऽवमानोदित तत्त्व बोध: सुराधिराजस् सह दिव्य गव्या ।
उपेत्य तुष्टाव स नष्ट गर्व: पृष्ट्वा पदाब्जं मणि मौलिना ते ॥॥64-3॥

स्नेहस् नुतैस् त्वां सुरभि: पयोभि: गोविन्द नामाङ्कित मभ्यषिञ्चत् ।
ऐराव तोपाहृत दिव्य गङ्गा पाथोभि रिन्द्रोऽपि च जात हर्ष: ॥॥64-4॥

जगत् त्रयीशे त्वयि गोकुलेशे तथाऽभिषिक्ते सति गोप वाट: ।
नाकेऽपि वैकुण्ठ पदेऽप्यलभ्यां श्रियं प्रपेदे भवत: प्रभावात् ॥॥64-5॥

कदाचि दन्तर् यमुनं प्रभाते स्नायन् पिता वारुण पूरुषेण ।
नीतस्त मानेतु मगा: पुरीं त्वं तां वारुणीं कारण मर्त्यरूप: ॥ ॥64-6॥

ससम्भ्रमं तेन जलाधि पेन प्रपूजितस् त्वं प्रतिगृह्य तातम् ।
उपागतस् तत् क्षण मात्मगेहं पिताऽवदत् तच्चरितं निजेभ्य: ॥॥64-7॥

हरिं विनिश्चित्य भवन्त मेतान् भवत् पदालोकन बद्ध तृष्णान् ॥
निरीक्ष्य विष्णो परमं पदं तत् दुराप मन्यैस् त्वमदीदृशस् तान् ॥॥64-8॥

स्फुरत् परानन्द रस प्रवाह प्रपूर्ण कैवल्य महापयोधौ ।
चिरं निमग्नाः खलु गोपसङ्घाः त्वयैव भूमन् पुन रुद्धृतास् ते ॥॥64-9॥

कर बदर वदेवं देव कुत्रा वतारे
निज पद मनवाप्यं दर्शितं भक्ति भाजाम् ।
तदिह पशुपरूपी त्वं हि साक्षात् परात्मा
पवन पुर निवासिन् पाहिमा मामयेभ्यः ॥ ॥64-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥